सुखानुशयी रागः । दुःखानुशयी द्वेषः । मोहः पुनरविद्येति । एताः सर्वाः वृत्तयः निरोद्धव्याः । आसां निरोधे सम्प्रज्ञातो वा समाधिः भवति, असम्प्रज्ञातो वा इति ॥

**प्रश्नः 3. योगसूत्र-व्यासभाष्यानुसारम् ईश्वरस्वरूपं निरूपयत ।**

उत्तरम्—अथ प्रधानपुरुषव्यतिरिक्तः कोयमीश्वरो नामेति। अस्याम् दिशि योगसूत्रकारः महर्षि पतञ्जलिः आह,— "**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष** ईश्वरः ।" अत्र अविद्यादयः क्लेशाः, कुशलाकुशलानि कर्माणि, तत्फलं विपाकः, तदनुगुणा वासना आशयाः, ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते । स हि तत्फलस्य भोक्ता इति । यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यन्ते । यो ह्यनेन भोगेन अपरामृष्टः स पुरुषविशेष ईश्वर इत्युच्यते । स तु सदैवेश्वरः सदैव मुक्तश्च । तच्च तस्यैश्वर्यं साम्यातिशय-विनिर्मुक्तम् । न तावदैश्वर्यान्तरेण तदतिशयते, यदेवातिशयि स्यात्तदेव तत्स्यात् । तस्माद्यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः । न च तत्समानमैश्वर्यमस्ति । तस्माद्यस्य साम्यातिशयविनिर्मुक्तम् ऐश्वर्यं स ईश्वरः । स च पुरुष-विशेषः । स ईश्वरः "पूर्वेषामपि गुरुः कालेनानवच्छेदात्"। तस्य परमगुरोः ईश्वरस्य वाचकः प्रणवः एवास्ति—"**तस्य वाचकः प्रणवः**" । तस्य प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावनम् । तदस्य योगिनः प्रणवं जपतः प्रणवार्थञ्च भावयतश्चित्तमेकाग्रं सम्पद्यते । यथोक्तम्—

**स्वाध्यायाद्योगमुपासीत् योगात्स्वाध्यायमासते ।**
**स्वाध्याययोगसम्पत्या परमात्मा प्रकाशते ॥**

ज्ञातव्यमस्ति यत् योगदर्शनस्य परमप्रयोजनं तु समाधिलाभ एवास्ति । स तु ईश्वरप्रणिधानादेव सम्भवति,— "**समाधिसिद्धिरीश्वरप्रणिधानात्**"। प्रणिधानात् भक्तिविशेषादा-वर्जितः ईश्वरस्तमनुगृह्णाति अभिध्यानमात्रेण । तदभिध्यानात् अपि योगिन आसन्नतमः समाधिलाभः फलं च भवतीति ।

**प्रश्नः 4. योगस्य निर्बीजसमाधेः वा अष्टावङ्गानि निरूपयत ।**

... विवेक-

'अस्तेयम्' इति । 'ब्र
विषयाणाम् अर्जन-
करणम् 'अपरिग्रहः'

(ii) नियमः—"शौच
तत्र शौचं मृज्जला
आभ्यन्तरं चित्तम
साधनादधिकस्यानुप
सुखलाभः भवति
जिघत्सापिपासे, शी
'स्वाध्यायः' मोक्षश
स्वाध्यायाद् इष्टदे
परमगुरौ सर्वकर्मार्प
अपि अनेन ईश
सिद्धिरीश्वरप्रणिधा

(iii) आसनम
वीरासनं, सिद्धास
इत्यादिः । उक्तञ्च-

**शुचौ देशे प्र**
**नात्युच्छ्रितं न**
**तत्रैकाग्रं मन**
**उपविश्यासने**

(iv) प्राणया
प्राणायामः ।"
श्वासः, कौष्ठस्य
उभयाभावः प्राण
समाधिप्रतिबन्धक
यथोक्तम्—"ततः

1. **स्मरणं कीर्तनं**
**संकल्पोऽध्यवस**
**एतन्मैथुनमष्टां**
**विपरीतं**